16-मृगेन्द्राः प्राधान्येन मत्तेभैः सह विगृह्णन्तस्तेषां मूर्धानमारुह्य गण्डौ च भित्त्वा तत्रत्यं मांसं भक्षयन्ति।

17-एवं वने स्थितानितरान् मृगानपि ते निघ्नन्ति।

18-यदा ते परितश्चरन्तो न मृगान् विन्दन्ति तदा तारं गर्जन्ति।

19-तद्गर्जनं श्रुत्वा सर्वे मृगाः सभयमितस्ततो धावन्ति।

20-तदा सिंहाः सत्वरं तेषामुपरि निपत्य तान् विध्यन्ति॥

21-कदाचिदाहारमलभमानः सिंहः सर्वावयवान् स्तब्धीकृत्य भूमौ शेते।

22-तथा शयानं तं दृष्ट्वा मृगास्तं मृतं मन्यमानास्तस्यान्तिके चरन्ति।

23-मृगमागतं दृष्ट्वा सिंहो झटित्युत्थाय तं गृह्णाति।

24-इत्थं सिंहाः स्वबुद्धिकौशलेन जीविकां वर्तयन्ति ॥

Sanskrit cümlelerin gramatik analizini yaparak Türkçeye çevirmek.